रूपमुख्यप्रयोजनाभावेऽपि कर्तृवाचकत्वम्। क्रियोद्देश्ये संयोगविभागादिरूपे फलविशिष्टव्यापारस्य धात्वर्थतावादिमते धात्वर्थतावच्छेदकरूपे च फले पृथक्शक्तिवादिमते कर्त्राख्यातस्थले तद्धातूपस्थाप्ये धात्वर्थांशे विशेषणतया भासमाने तद्धातुजन्ये च संयोगादिके फले च। इत्थमेव शब्दार्थरत्नेऽस्माभिर्दर्शितं यथा

“तत्र फलतीतिव्युत्पत्त्या फलं नाम तद्धात्वर्थजन्यं संयोग विभागादि, गम्यादौ विभागस्य फलत्ववारणाय तद्धातूपस्थाप्यत्वेन विशेषणेऽपि विभागाजन्यसंयोगस्य पतनफलत्वमते विभागस्य तद्धात्वर्थजन्यत्वात् तद्धातूपस्थाप्यत्वादतिव्याप्तिरतस्तद्धात्वर्थे विशेषणतया भासमानत्वेनैव विशेषणीयं गम्यादौ च विभागस्य तद्धात्वर्थे विशेषणतया भासमानत्वाभावात् न फलत्वप्रसङ्गः। मञ्जूषाकृन्मते तु कर्तृप्रत्ययस्थले तथाभासमानत्वमिति विवेकः। क्रियाविशेषणादेर्धात्वर्थे विशेषणत्वेऽपि तज्जन्यत्वाभावान्न फलत्वप्रसङ्गः। विशेषणत्वञ्च साक्षादेव विवक्षितं तेन घटं करोतीत्यादौ घटादेः धात्वर्थक्रियाजन्यस्य विभक्त्यर्थद्वारा तद्विशेषणत्वेऽपि न फलत्वापत्तिः” इति।

**क्रियाभ्युपगम** पु० क्रियायाः कर्षणादिक्रियार्थमभ्युपगमः चतुर्थ्यर्थे ६त०। अत्र क्षेत्रे उत्पन्नस्य शस्यस्य उभयोः फलभागितेतिनियमेन कर्षणाद्यर्थमन्यक्षेत्रस्वीकारे। “क्रियाभ्युपगमात्त्वेतद्बीजार्थं यत् प्रदीयते। तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च” मनुः।

**क्रियाभ्यावृत्ति** स्त्री क्रियाया अभ्यावृत्तिः। क्रियायाः पौनःपुन्ये। “क्रियाभ्यावृत्तिगणने कृत्वसुच्” पा०। विवृतमेतदस्माभिः शब्दार्थरत्ने यथा

“क्रियायाएव पौनःपुन्यसम्भवेनाभ्यावृत्तिपदेनैव क्रियाप्राप्तौ पुनः क्रियाग्रहणेन इतरांशे विशेषणतानापन्नसाध्यक्रियाया एवाभ्यावृत्तौ तेषां साधुत्वज्ञापनात् पञ्चकृत्वः पचतीत्येव प्रयोगः न तु पञ्चकृत्वःपाक इत्यपि। केचित्तु “द्विर्वचनेऽचीति” पा० निर्द्देशात् साध्यरूपक्रियान्वये एव तेषां साधुत्वं तेन भावघञन्तादावपि धातुना साध्यक्रियाया अभिधानात् पञ्चकृत्वः पाक इत्यपि भवत्येव। सिद्धरूपक्रियायां तदन्वयविवक्षायां तु नैवं तेन तत्र पञ्च इत्येव स्यादिति प्राहुः”

**क्रियायोग** पु० क्रियैव योगः योगोपायः। “तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगाः” इति पातञ्जलसूत्रभाष्याद्युक्ते योगोपायभूते क्रियाभेदे। तस्य योगोपायत्वादिदर्शकं तद्वाक्यं कर्म्मयोगशब्दे ४७११पृ० दर्शितम्। “ज्ञानयोगस्तु योगस्य यस्तु साधनमात्मना। यस्तु बाह्यार्थसंयोगः क्रियायोगः स उच्यते। प्रधानं कारणं योगोमुक्तेर्मुनिवरोत्तम!। क्रियायोगस्तु योगस्य परमं तत्त्व साधनम्” अग्निपु०। मत्स्यपु०५२अ० विस्तरेणोक्तं यथा

“कर्म्मयोगञ्च वक्ष्यामि यथा विष्णुविभाषितम्। ज्ञानयोगसहस्राद्धि कर्म्मयोगः प्रशस्यते। कर्म्मयोगोद्भवं ज्ञानं तस्मात्तत्परमम्पदम्। कर्म्मज्ञानोद्भवं ब्रह्म न च ज्ञानमकर्म्मणः। तस्मात् कर्म्मणि युक्तात्मा तत्त्वमाप्नोति शाश्वतम्। वेदोऽखिलो धर्म्ममूलमाचारश्चैव तद्विदाम्। अष्टावात्मगुणास्तस्मिन् प्रधानत्वेन संस्थिताः। दया सर्वेषु भूतेषु क्षान्तीरक्षाऽऽतुरस्य तु। अनसूया तथा लोके शौचमन्तर्बहिर्द्विजाः!। अनायासेषु कार्येषु माङ्गल्याचारसेवनम्। न च द्रव्येषु कार्पण्यमार्तेषूपार्जितेषु च। तथाऽस्पृहा परद्रव्ये परस्त्रीषु च सर्व्वदा। अष्टावात्मगुणाः प्रोक्ताः पुराणस्य तु कोविदैः। अयमेव क्रियायोगो ज्ञानयोगस्य साधकः। कर्म्मयोगं विना ज्ञानं कस्यचिन्नेह दृश्यते। श्रुतिस्मृत्युदितं धर्म्ममुपतिष्ठेत् प्रयत्नतः। देवतानां पितॄणाञ्च मनुष्याणाञ्च सर्व्वदा। कुर्यादहरहर्यज्ञैर्भूतर्षिगणतर्पणम्। स्वाध्यायैरर्चयेच्चर्षीन् होमैर्विद्वान् यथाविधि। पितॄन् श्राद्धैरन्नदानैर्भूतानि बलिकर्म्मभिः। पञ्चैते विहिता यज्ञाः पञ्चसूनापनुत्तये। कण्डनी पेषणी चूल्ली जलकुम्भी प्रमार्जनी। पञ्च सूना गृहस्थस्य तेन स्वर्गं न गच्छति। तत्पापनाशनायामी पञ्च यज्ञाः प्रकीर्त्तिताः। द्वाविंशतिस्तथाष्टौ च ये संस्काराः प्रकीर्त्तिताः। तद्युक्तोऽपि न मोक्षाय यस्त्वात्मगुणवर्जितः। तस्मादात्मगुणोपेतः श्रुतिकर्म्म समाचरेत्। गोब्राह्मणानां वित्तेन सर्वदा भद्रमाचरेत्। गोभूहिरण्यवासोभिर्गन्धमाल्योदकेन च। पूजयेद् ब्रह्मविष्ण्वर्करुद्रवस्वात्मकं शिवम्। व्रतोपवासैर्विधिवत् श्रद्धया च विमत्सरः। योऽसावतीन्द्रियः शान्तः सूक्ष्मोऽव्यक्तः सनातनः। वासुदेवो जगन्मूर्त्तिस्तस्य सम्भूतयो ह्यमी। ब्रह्मा विष्णुश्च भगवान् मार्त्तण्डो वृषवाहनः। अष्टौ च वसवस्तद्वदेकादशगणाधिपाः। लोकपालाधिपाश्चैव पितरो मातरस्तथा। इमा विभूतयः प्रोक्ताश्चराचरसमन्विताः। ब्रह्माद्याश्चतुरो मूलमव्यक्ताधिपतिः स्मृतः। ब्रह्मणा चाथ सूर्य्येण विष्णुनाथ शिवेन वा। अभेदात् पूजितेन स्यात् पूजितं सचराचरम्।